# Lomashamuniproktam Balakrishna Kavacham

# લોમશમુનિપ્રોક્તં બાલકૃષ્ણકવચમ્

## Document Information

Text title : Lomashamuniproktam Balakrishna Kavacham

File name : lomashamuniproktaMbAlakRRiShNakavacham.itx

Category : vishhnu, vishnu, krishna, lakShmInArAyaNIyasaMhitA, kavacha

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : lakShmInArAyaNIyasaMhitA | khaNDa 2 | adhyAya 61/36-47||

Latest update : February 5, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2026

*sanskritdocuments.org*

# લોમશમુનિપ્રોક્તં બાલકૃષ્ણકવચમ્

તમેનં કથયામ્યદ્ય સ્તવં કૃષ્ણપરાયણમ્ ।
“બાલકૃષ્ણોઽસ્તુ મે પ્રાચ્યાં ચક્રહેતિઃ પરેશ્વરઃ ॥ ૩૬॥

ગદાધરો બાલકૃષ્ણો દક્ષિણે મેઽસ્તુ સર્વદા ।
પશ્ચિમે શાર્ઙ્ગધૃક કૃષ્ણનારાયણોઽસ્તુ મે સદા ॥ ૩૭॥

ઉત્તરે ખડ્ગધૃક્ કૃષ્ણનારાયણોઽસ્તુ મે સદા ।
કોણેષ્વસ્તુ હૃષીકેશો મધ્યે મધ્યે જનાર્દનઃ ॥ ૩૮॥

પૃથ્વ્યાં વરાહરૂપોઽસ્તુ વ્યોમ્નિ નરહરિઃ પ્રભુઃ ।
ક્ષુરધારાઽતિતીક્ષ્ણં ચ સુદર્શનં સમન્તતઃ ॥ ૩૯॥

પ્રેતભૂતાન્ પ્રહન્ત્વેવ રાક્ષસાઁશ્ચ નિશાચરાન્ ।
ગદા સહસ્રધારોર્ધ્વં હન્તુ વૃકાન્ પિશાચકાન્ ॥ ૪૦॥

શાર્ઙ્ગ ધનુર્હરેસ્તિર્યક્કુષ્માણ્ડાદીન્ પ્રહન્તુ ચ ।
યક્ષાન્ દૈત્યાન્ જૃમ્ભકાઁશ્ચ ખગાન્ ક્રૂરાન્ વિનાયકાન્ ॥ ૪૧॥

શઙ્ખો વિષ્ણોર્નિનાદેન હન્તુ દુષ્ટાઁશ્ચ પન્નગાન્ ।
સિંહાન્ વ્યાઘ્રાન્ શરભાઁશ્ચ દન્દશૂકાન્ પશૂઁસ્તથા ॥ ૪૨॥

વિષ્ણોઃ પદ્મં મમ શત્રૂન્ સૌમ્યાન્ દધાતુ ગન્ધતઃ ।
ચિત્તવૃત્તિહરાન્ સ્મૃત્યાહરાન્ બલૌજસાં હરાન્ ॥ ૪૩॥

સમ્પદ્ભોગહરાઁશ્ચાપિ શુભલક્ષણહારકાન્ ।
સ્ત્રીપુત્રધનસદનહરાન્ પ્રશામયત્વપિ ॥ ૪૪॥

હરેઃ સઙ્કીર્તનાચ્ચાઽસ્તુ સ્વાસ્થ્યમૈન્દ્રિયકં મમ ।
બુદ્ધિસ્વાસ્થ્યં મનઃસ્વાસ્થ્યં દેહસ્વાસ્થ્યં સુખાવહમ્ ॥ ૪૫॥

પૃષ્ઠે ચાગ્રે પાર્શ્વયોશ્ચ કોણેષ્વસ્તુ હરિર્મમ ।
શિખાયાં મે નખેષ્વેષઃ ચર્મસ્વસ્તુ હરિર્મમ” ॥ ૪૬॥

“ૐ નમઃ શ્રીકૃષ્ણનારાયણાય સ્વામિને સ્વાહા” ।
ઇત્યેવં રાધિકે! રક્ષાસ્તોત્રં શ્રીલોમશો મુનિઃ ॥ ૪૭॥

દદૌ સર્વેભ્ય એવાદૌ તતઃ પ્રાહ નિદર્શનમ્ ।

ઇતિ શ્રીલક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૬૧-અધ્યાયાન્તર્ગતં
લોમશમુનિપ્રોક્તં બાલકૃષ્ણકવચમ્ ।

લક્ષ્મીનારાયણીયસંહિતા । ખણ્ડ ૨। અધ્યાય ૬૧/૩૬-૪૭॥

lakShmInArAyaNIyasaMhitA . khaNDa 2. adhyAya 61/36-47..

Proofread by PSA Easwaran

---

*Lomashamuniproktam Balakrishna Kavacham*
pdf was typeset on February 5, 2026

Please send corrections to *sanskrit@cheerful.com*